**अङ्कपाश** पु० अङ्कः पाश इव बन्धनेनेव पातनहेतुरत्र । लीलावत्युक्ते एकाद्यङ्कानां स्थानविनिमयेन संख्याभेदबोधके, तदैक्यसंख्यासङ्कलनोपयोगिनि च प्रक्रियाभेदे "स्थानान्तमेकादिचयावघातः संख्याविभेदो नियतैः स्युरङ्कैः । भक्तोऽङ्कमित्याङ्कसमासनिघ्नः स्थानेषु युक्तोमितिसंयुतिः स्यादिति"। यथा १, २, एतयोरङ्कयोः स्थानद्वये, स्थितिः तयोः स्थानविनिमये कति भेदा, भेदभिन्नानाञ्च संख्यैक्यमितिः केति १ च पृष्टे अनेनैव प्रकरणेन १२, २२, एतौ द्वौ भेदौ ऐक्याङ्कमितिः" ३३ इत्युत्तरं तत्स्थानेनैव भवति । "न गुणो न हरो न कृतिर्न घनः पृष्टस्तथापि दुष्टानाम् । गर्वितगणकबहूनां स्यात् पातोऽवश्यमङ्कपाशेऽस्मिन्निति" लीलावती।

**अङ्कपूरण** न० अङ्कयोस्तत्संख्ययोः पूरणं गुणनम् । अङ्कयोर्गुणने । [परितोऽङ्कस्य बन्धनम् ।

**अङ्कबन्ध** पु० अङ्कस्य बन्धः । क्रोड़बन्धे । यथा पर्य्यङ्कबन्धः ।

**अङ्कलोड्य** पु० अङ्केन लोड्यतेऽसौ लोड-ण्यत् ७त० । चिञ्चोड़वृक्षे ।

**अङ्कलोप** पु० अङ्कस्य वियोज्यसंख्याया इष्टसंख्यातो लोपः वियोजनम् । इष्टसंख्यातः कस्याश्चित् संख्याया वियोजने यथा नवाङ्कसंख्यातः पञ्चाङ्कसंख्याया वियोजने चतुःसंख्याऽवशिष्यते । एवम् अन्यत्रापि ।

**अङ्कस्** न० अन्च-असुन् कुत्वम् । चिह्ने, शरीरे च । "पथामङ्कांस्यन्वापनीफलदिति" वेदः ।

**अङ्कस** न० अङ्कोऽस्मिन्नस्ति अच् । चिह्नयुक्ते । "श्येनस्येव ध्रजतोऽङ्कसं परीति" यजुः । अङ्कसं वस्त्रमाप्रपदिकमिति ।

**अङ्काङ्क** न० अङ्के मध्ये अङ्काःशतपत्रादिचिह्नानि यस्य । जले "आपो वै अङ्काङ्काः छन्द" इति, अङ्काङ्कं छन्द इति च श्रुतिः । [कारैरङ्कितं मेषवाहनमिति" वह्निध्यानम् ।

**अङ्कित** त्रि० अङ्क-क्त । चिह्नयुक्तीकृते, "स्वाहास्वधावषट्-

**अङ्किन्** त्रि० अङ्कः आलिङ्गनस्थानत्वेन अस्यास्ति अङ्क+इनि । अङ्केनालिङ्ग्य वादनीये मृदङ्गादिवाद्यभेदे, क्रोड़विशिष्टे च । "पाशायामङ्गिनो ये चरन्तीति" वेदः ।

**अङ्किनी** स्त्री अङ्कानां चिह्नानां समूहः खलादि० इनि ङीप् । चिह्नसंघाते । अस्त्यर्थे इनि ङीप् । अङ्कयुक्तस्त्रियाम् ।

**अङ्कुर** अस्त्री० अङ्क-उरच् । वीजादभिनवोत्पन्ने, ह्रस्विकामुद्भिद्य जाते तृणवृक्षादौ "हर्म्याग्रसंरूढ़तृणाङ्कुरेष्विति" रघुः । जले, शीघ्रोत्पत्तिसाधर्म्यात् रुधिरे, लोम्नि च मुकुले च "चूताङ्कुरास्वादकषायकण्ठ" इति कुमा०।

**अङ्कुरक** पु०अङ्क्यते तृणादिना सञ्चीयतेऽसौ अन्च-घुरच् ततः क । पक्ष्यादीनां वासस्थाने (वासा इति) ख्याते ।

**अङ्कुरित** त्रि० अङ्कुरः जातोऽस्य ता० इतच् । जाताङ्कुरे ।

**अङ्कुश** अस्त्री० अङ्क-उशच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहास्त्रभेदे (डाङ्श) इति ख्याते । "तिरोगतं साङ्कुशमुद्वहन् शिर" इति माघः । "सन्निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशमिति" रघुः । प्रतिबन्धे च "निरङ्कुशाः कवय इति" मल्लिनाथः पक्षा० फक् । आङ्कुशायनः अङ्कुशसन्निकृष्टस्थाने त्रि० ।

**अङ्कुशग्रह** पु० गृह्णातीति ग्रह-अच् ६त० । अङ्कुशधारिणि निषादिनि । "अन्वेतुकामोऽवमताङ्कुशग्रह" इति माघः ।

**अङ्कुशदुर्द्धर** पु० दुःखेन धार्य्यते व्यवस्थाप्यते दुर्-धारि-खल् ह्रस्वः अङ्कुशेन-दुर्द्धरः ३त० । दुर्दान्तहस्तिनि ।

**अङ्कुशधारिन्** पु० अङ्कुशं धारयति धारि-णिनि । हस्तिपालके ।

**अङ्कुशमुद्रा** स्त्री अङ्कुशाकारा मुद्रा । "ऋज्वीञ्च मध्यमां कृत्वा तन्मध्यपर्व्वमूलतः । तर्ज्जनीं किञ्चिदाकुञ्चेत् सा मुद्राऽङ्कुशसंज्ञितेति" तन्त्रोक्ते तीर्थावाहनाद्यर्थं कल्पिते अङ्गुलिसन्निवेशरूपेमुद्राभेदे ।

**अङ्कुशी** स्त्री अङ्कुशः चित्तनागरोधनोपायः विवेकः अस्त्यस्याः अच् गौ० । जैनीयदेवीभेदे । [तृणवृक्षादौ ।

**अङ्कूर** पु० अङ्क-खर्जूरादित्वात् ऊरच् । अभिनवोत्पन्ने

**अङ्कूष** अस्त्री० अङ्क-ऊषच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहमयेऽस्त्रभेदे (डाङ्श) ।

**अङ्कोट(ठ)** (ल) पु० अङ्क्यते लक्ष्यते कीलाकारकण्टैः । अङ्क-ओट (ओठ) (ओल) वा । पीतवर्णसारे गन्धयुक्तपुष्पे दीर्घकण्टकयुक्ते रक्तवर्णफले (आकोड) इति ख्याते वृक्षे ।

**अङ्कोलक** पु० अङ्कोल+स्वार्थे-क । आकोड इति ख्याते वृक्षे ।

**अङ्कोलिका** स्त्री वल-अच् नि०संप्रसारणे-उलः अङ्काय तद्दानाय उलः स्वार्थे क। आलिङ्गनक्रियायाम् । [विषभेदे ।

**अङ्कोलसार** पु० अङ्कोलस्य सारः ६त० । अङ्कोटवृक्षजाते

**अङ्कोल्लिका** स्त्री । पृ० साधुः । अङ्कोठवृक्षे ।

**अङ्क्य** पु० अङ्के क्रोड़े स्थापयित्वा वाद्यतेऽसौ यत्, अङ्के साधुः अङ्क+य वा । "सार्द्धतालत्रयायामः चतुर्द्दशाङ्गुलाननः । हरीतक्याकृतियः स्यादङ्क्योऽङ्के स हि वाद्यते इत्युक्ते" क्रोड़े स्थापनपूर्व्वकं वादनीये मृदङ्गादौ । अङ्कनीये त्रि० ।

**अङ्ग** चिह्नयुक्तकरणे अदन्तचुरादि उभय० सकर्म्मकः सेट् । अङ्गय-ति ते आञ्जिग-त् त । मतान्तरे अङ्गापयति ते ।